# Vanara Ashtakam

# वानराष्टकम्

## Document Information

Text title : vAnarAShTakam

File name : vAnarAShTakam.itx

Category : misc, sahitya, advice, aShTaka

Location : doc_z_misc_general

Transliterated by : Aaditya Kalyanaraman

Proofread by : Aaditya Kalyanaraman

Description/comments : From Kavya Sangraha, A Sanskrit Anthology, Dr. John Haeberlin, 1847

Latest update : April 29, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 29, 2021

*sanskritdocuments.org*

# वानराष्टकम्

ईर्षी दक्षः क्रतौ रूपं स्तब्धःशुष्केन्धनं जवः ।
दुर्मन्त्रिणमिति श्लोकाः कथिता वानराष्टके ।
ईर्षी घृणीत्वसन्तुष्टः क्रोधनो नित्यशङ्कितः ।
परभाग्योपजीवी च षडेते दुःखभागिनः ॥ १॥

दक्षः श्रियमधिगच्छति पथ्याशी कल्यतां सुखमरोगी ।
उद्यक्तो विद्यां तथा धर्मार्थयशांसि विनीतः ॥ २॥

क्रतौ विवाहे व्यसने रिपुक्षये
यशस्करे कर्मणि मित्रसङ्ग्रहे ।
प्रियासु नारीषु तथैव बान्धवे
प्यतिव्ययो नास्ति नराधिपाष्टसु ॥ ३॥

रूपं जरा सर्वसुखानि तृष्णा
खलेषु सेवा पुरुषाभिमानम् ।
याञ्चा गुरुत्वं गुणमात्मपूजा
चिन्ता बलं हन्त्यदया च लक्ष्मीम् ॥ ४॥

स्तब्धस्य नश्यति यशो विषमस्य मैत्री
नष्टक्रियस्य कुलमर्थपरस्य धर्मः ।
विद्याफल व्यसनिनः कृपयस्य पुस्तं
राज्यं प्रमत्तसचिवस्य नराधिपस्य ॥ ५॥

शुष्केन्धने वह्निरुपैति वृद्धिं
वालेषु शोक श्चपलेषु कोपः ।
कान्तासु कामो निपुणेषु चित्तं
धर्मो दयावत्सु महत्स्सु धैर्यम् ॥ ६॥

जवोहि सप्तेः परमं विभूषणं

चपाङ्गनायाः कृशता तपस्विनः ।
द्विजस्य विद्यैव मुनेरपिक्षमा
पराक्रमः शस्त्रबलोपजीविनाम् ॥ ७॥

दुर्मन्त्रिणं कमुपयाति न नीतिदोषाः
सन्तापयन्ति कमपथ्यभुजं न रोगाः ।
कं स्त्री न मोहयति कं न निहन्ति मृत्युः
कं स्वीकृता न विषयाः परितापयन्ति ॥ ८॥

इति वानराष्टकं समाप्तम् ।

Encoded and proofread by Aaditya Kalyanaraman

*Vanara Ashtakam*

pdf was typeset on April 29, 2021

Please send corrections to *sanskrit@cheerful.com*